श्रीमद् भागवत रसिक कुटुंब

॥ श्रीभवानीसहस्रनामस्तोत्रम् ॥



ॐ अस्यश्रीभवानीनामसहस्रस्तवराजस्य,

श्रीभगवान्महादेव ऋषिः ,अनुष्टुप्छन्दः,

आद्या शक्तिः श्रीभगवती भवानी देवता,

ह्रीं बीजं, श्रीं शक्तिः, क्लीं कीलकं,

श्रीभगवतीभवानीप्रीत्यर्थे जपे विनियोगः ।

अथ ध्यानम्

ॐ बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनाम् ।

पाशाङ्कुशवराभीतीर्- धारयन्तीं शिवां भजे ॥

ॐ महाविद्या जगन्माता महालक्ष्मीः शिवप्रिया ।

विष्णुमाया शुभा शान्ता सिद्धासिद्धसरस्वती ॥ 1॥

क्षमा कान्तिः प्रभा ज्योत्स्ना पार्वती सर्वमङ्गला ।

हिङ्गुला चण्डिका दान्ता पद्मा लक्ष्मीर्हरिप्रिया ॥ 2॥

त्रिपुरा नन्दिनी नन्दा सुनन्दा सुरवन्दिता ।

यज्ञविद्या महामाया वेदमाता सुधाधृतिः ॥ 3॥

प्रीतिप्रदा प्रसिद्धा च मृडानी विन्ध्यवासिनी ।
सिद्धविद्या महाशक्तिः पृथ्वी नारदसेविता ॥ 4॥

पुरुहूतप्रिया कान्ता कामिनी पद्मलोचना ।
प्रह्लादिनी महामाता दुर्गा दुर्गतिनाशिनी ॥ 5॥

ज्वालामुखी सुगोत्रा च ज्योतिः कुमुदवासिनी ।
दुर्गमा दुर्लभा विद्या स्वर्गतिः पुरवासिनी ॥ 6॥

अपर्णा शाम्बरी माया मदिरामृदुहासिनी ।
कुलवागीश्वरी नित्या नित्यक्लिन्ना कृशोदरी ॥ 7॥

कामेश्वरी च नीला च भीरुण्डा वह्निवासिनी ।
लम्बोदरी महाकाली विद्याविद्येश्वरी तथा ॥ 8॥

नरेश्वरी च सत्या च सर्वसौभाग्यवर्धिनी ।
सङ्कर्षिणी नारसिंही वैष्णवी च महोदरी ॥ 9॥

कात्यायनी च चम्पा च सर्वसम्पत्तिकारिणी ।
नारायणी महानिद्रा योगनिद्रा प्रभावती ॥ 10॥

प्रज्ञा पारमिताप्राज्ञा तारा मधुमती मधुः ।
क्षीरार्णवसुधाहारा कालिका सिंहवाहना ॥ 11॥

ॐकारा च सुधाकारा चेतना कोपनाकृतिः ।
अर्धबिन्दुधराधारा विश्वमाता कलावती ॥ 12॥

पद्मावती सुवस्त्रा च प्रबुद्धा च सरस्वती ।
कुण्डासना जगद्धात्री बुद्धमाता जिनेश्वरी ॥ 13॥

जिनमाता जिनेन्द्रा च शारदा हंसवाहना ।
राजलक्ष्मीर्वषट्कारा सुधाकारा सुधोत्सुका ॥ 14॥

राजनीतिस्त्रयीवार्ता दण्डनीतिः क्रियावती ।
सद्भूतिस्तारिणी श्रद्धा सद्गतिः सत्परायणा ॥ 15॥

सिन्धुर्मन्दाकिनी गङ्गा यमुना च सरस्वती ।
गोदावरी विपाशा च कावेरी च शतह्रदा ॥ 16॥

सरयूश्चन्द्रभागा च कौशिकी गण्डकी शुचिः ।
नर्मदा कर्मनाशा च चर्मण्वती च वेदिका ॥ 17॥

वेत्रवती वितस्ता च वरदा नरवाहना ।
सती पतिव्रता साध्वी सुचक्षुः कुण्डवासिनी ॥ 18॥

एकचक्षुः सहस्राक्षी सुश्रोणिर्भगमालिनी ।
सेनाश्रोणिः पताका च सुव्यूहा युद्धकांक्षिणी ॥ 19॥

पताकिनी दयारम्भा विपञ्ची पञ्चमप्रिया ।
परा परकलाकान्ता त्रिशक्तिर्मोक्षदायिनी ॥ 20॥

ऐन्द्री माहेश्वरी ब्राह्मी कौमारी कमलासना ।
इच्छा भगवती शक्तिः कामधेनुः कृपावती ॥ 21॥

वज्रायुधा वज्रहस्ता चण्डी चण्डपराक्रमा ।
गौरी सुवर्णवर्णा च स्थितिसंहारकारिणी ॥ 22॥

एकानेका महेज्या च शत बाहुर्महाभुजा ।
भुजङ्गभूषणा भूषा षट्चक्राक्रमवासिनी ॥ 23॥

षट्चक्रभेदिनी श्यामा कायस्था कायवर्जिता ।
सुस्मिता सुमुखी क्षामा मूलप्रकृतिरीश्वरी ॥ 24॥

अजा च बहुवर्णा च पुरुषार्थप्रवर्तिनी ।
रक्ता नीला सिता श्यामा कृष्णा पीता च कर्बुरा ॥ 25॥

क्षुधा तृष्णा जरा वृद्धा तरुणी करुणालया ।
कला काष्ठा मुहूर्ता च निमिषा कालरूपिणी ॥ 26॥

सुवर्णरसना नासाचक्षुः स्पर्शवती रसा ।
गन्धप्रिया सुगन्धा च सुस्पर्शा च मनोगतिः ॥ 27॥

मृगनाभिर्मृगाक्षी च कर्पूरामोदधारिणी ।
पद्मयोनिः सुकेशी च सुलिङ्गा भगरूपिणी ॥ 28॥

योनिमुद्रा महामुद्रा खेचरी खगगामिनी ।
मधुश्रीर्माधवी वल्ली मधुमत्ता मदोद्धता ॥ 29॥

मातङ्गी शुकहस्ता च पुष्पबाणेक्षुचापिनी ।
रक्ताम्बरधराक्षीबा रक्तपुष्पावतंसिनी ॥ 30॥

शुभ्राम्बरधरा धीरा महाश्वेता वसुप्रिया ।
सुवेणी पद्महस्ता च मुक्ताहारविभूषणा ॥ 31॥

कर्पूरामोदनिःश्वासा पद्मिनी पद्ममन्दिरा ।
खड्गिनी चक्रहस्ता च भुशुण्डी परिघायुधा ॥ 32॥

चापिनी पाशहस्ता च त्रिशूलवरधारिणी ।
सुबाणा शक्तिहस्ता च मयूरवरवाहना ॥ 33॥

वरायुधधरा वीरा वीरपानमदोत्कटा ।
वसुधा वसुधारा च जया शाकम्भरी शिवा ॥ 34॥

विजया च जयन्ती च सुस्तनी शत्रुनाशिनी ।
अन्तर्वती वेदशक्तिर्वरदा वरधारिणी ॥ 35॥

शीतला च सुशीला च बालग्रहविनाशिनी ।
कौमारी च सुपर्णा च कामाख्या कामवन्दिता ॥ 36॥

जालन्धरधरानन्ता कामरूपनिवासिनी ।
कामबीजवती सत्या सत्यमार्गपरायणा ॥ 37॥

स्थूलमार्गस्थिता सूक्ष्मा सूक्ष्मबुद्धिप्रबोधिनी ।
षट्कोणा च त्रिकोणा च त्रिनेत्रा त्रिपुरसुन्दरी ॥ 38॥

वृषप्रिया वृषारूढा महिषासुरघातिनी ।
शुम्भदर्पहरा दीप्ता दीप्तपावकसन्निभा ॥ 39॥

कपालभूषणा काली कपालामाल्यधारिणी ।
कपालकुण्डला दीर्घा शिवदूती घनध्वनिः ॥ 40॥

सिद्धिदा बुद्धिदा नित्या सत्यमार्गप्रबोधिनी ।
कम्बुग्रीवावसुमती छत्रच्छाया कृतालया ॥ 41॥

जगद्गर्भा कुण्डलिनी भुजगाकारशायिनी ।
प्रोल्लसत्सप्तपद्मा च नाभिनालमृणालिनी ॥ 42॥

मूलाधारा निराकारा वह्निकुण्डकृतालया ।
वायुकुण्डसुखासीना निराधारा निराश्रया ॥ 43॥

श्वासोच्छवासगतिर्जीवा ग्राहिणी वह्निसंश्रया ।
वल्लीतन्तुसमुत्थाना षड्रसा स्वादलोलुपा ॥ 44॥

तपस्विनी तपःसिद्धि तपसः सिद्धिदायिनी ।
तपोनिष्ठा तपोयुक्ताः तापसी च तपःप्रिया ॥ 45॥

सप्तधातुर्मयीर्मूतिः सप्तधात्वन्तराश्रया ।
देहपुष्टिर्मनःपुष्टिरन्नपुष्टिर्बलोद्धता ॥ 46॥

औषधी वैद्यमाता च द्रव्यशक्तिप्रभाविनी ।
वैद्या वैद्यचिकित्सा च सुपथ्या रोगनाशिनी ॥ 47॥

मृगया मृगमांसादा मृगत्वङ् मृगलोचना ।
वागुराबन्धरूपा च बन्धरूपावधोद्धता ॥ 48॥

बन्दी बन्दिस्तुता कारागारबन्धविमोचिनी ।
शृङ्खला कलहा बद्धा दृढबन्धविमोक्षिणी ॥ 49॥

अम्बिका बालिका चाम्बा स्वच्छा साधुजनार्चिता ।
कालिकी कुलविद्या च सुकुला कुलपूजिता ॥ 50॥

कालचक्रभ्रमिर्भ्रान्ता विभ्रमा भ्रमनाशिनी ।
वात्यावी मेघमाला च सुवृष्टिः सस्यवर्धिनी ॥ 51॥

अकारा च इकारा च उकारौकाररूपिणी ।
ह्रीङ्कार बीजरूपा च क्लीङ्काराम्बरवासिनी ॥ 52॥

सर्वाक्षरमयीशक्तिरक्षरा वर्णमालिनी ।
सिन्दूरारुणवर्णा च सिन्दूरतिलकप्रिया ॥ 53॥

वश्या च वश्यबीजा च लोकवश्यविभाविनी ।
नृपवश्या नृपैः सेव्या नृपवश्यकरप्रिया ॥ 54॥

महिषा नृपमान्या च नृपान्या नृपनन्दिनी ।
नृपधर्ममयी धन्या धनधान्यविवर्धिनी ॥ 55॥

चतुर्वर्णमयीमूर्तिश् - चतुर्वर्णैश्च पूजिता ।
सर्वधर्ममयीसिद्धिश् - चतुराश्रमवासिनी ॥ 56॥

ब्राह्मणी क्षत्रिया वैश्या शूद्रा चावरवर्णजा ।
वेदमार्गरता यज्ञा वेदिर्विश्वविभाविनी ॥ 57॥

अनुशस्त्रमयी विद्या वरशस्त्रास्त्रधारिणी ।
सुमेधा सत्यमेधा च भद्रकाल्यपराजिता ॥ 58॥

गायत्री सत्कृतिः सन्ध्या सावित्री त्रिपदाश्रया ।
त्रिसन्ध्या त्रिपदी धात्री सुपर्वा सामगायिनी ॥ 59॥

पाञ्चाली बालिका बाला बालक्रीडा सनातनी ।
गर्भाधारधराशून्या गर्भाशयनिवासिनी ॥ 60॥

सुरारिघातिनी कृत्या पूतना च तिलोत्तमा ।
लज्जा रसवती नन्दा भवानी पापनाशिनी ॥ 61॥

पट्टाम्बरधरा गीतिः सुगीतिर्ज्ञानलोचना ।
सप्तस्वरमयी तन्त्री षड्जमध्यमधैवता ॥ 62॥

मूर्छना ग्रामसंस्थाना मूर्छा सुस्थानवासिनी ।
अट्टाट्टहासिनी प्रेता प्रेतासननिवासिनी ॥ 63॥

गीतनृत्यप्रिया कामा तुष्टिदा पुष्टिदा क्षमा ।
निष्ठा सत्यप्रिया प्राज्ञा लोलाक्षी च सुरोत्तमा ॥ 64॥

सविषा ज्वालिनी ज्वाला विश्वमोहार्तिनाशिनी ।
विषारिर्नागदमनी कुरुकुल्ल्याऽमृतोद्भवा ॥ 65॥

भूतभीतिहरारक्षा भूतावेशविनाशिनी ।
रक्षोघ्नी राक्षसी रात्रिर्दीर्घनिद्रा निवारिणी ॥ 66॥

चन्द्रिका चन्द्रकान्तिश्च सूर्यकान्तिर्निशाचरी ।
डाकिनी शाकिनी शिष्या हाकिनी चक्रवाकिनी ॥ 67॥

सिता सितप्रिया स्वङ्गा सकला वनदेवता ।
गुरुरूपधरा गुर्वी मृत्युर्मारी विशारदा ॥ 68॥

महामारी विनिद्रा च तन्द्रा मृत्युविनाशिनी ।
चन्द्रमण्डलसङ्काशा चन्द्रमण्डलवासिनी ॥ 69॥

अणिमादिगुणोपेता सुस्पृहा कामरूपिणी ।
अष्टसिद्धिप्रदा प्रौढा दुष्टदानवघातिनी ॥ 70॥

अनादिनिधना पुष्टिश्चतुर्बाहुश्चतुर्मुखी ।
चतुस्समुद्रशयना चतुर्वर्गफलप्रदा । ॥ 71॥

काशपुष्पप्रतीकाशा शरत्कुमुदलोचना ।
भूता भव्या भविष्या च शैलजा शैलवासिनी ॥ 72॥

वाममार्गरता वामा शिववामाङ्गवासिनी ।
वामाचारप्रिया तुष्टिर्लोपामुद्रा प्रबोधिनी ॥ 73॥

भूतात्मा परमात्मा भूतभावविभाविनी ।
मङ्गला च सुशीला च परमार्थप्रबोधिनी ॥ 74॥

दक्षिणा दक्षिणामूर्तिः सुदीक्षा च हरिप्रसूः ।
योगिनी योगयुक्ता च योगाङ्गा ध्यानशालिनी ॥ 75॥

योगपट्टधरा मुक्ता मुक्तानां परमा गतिः ।
नारसिंहा सुजन्मा च त्रिवर्गफलदायिनी ॥ 76॥

धर्मदा धनदा चैव कामदा मोक्षदाद्युतिः ।
साक्षिणी क्षणदा दक्षा मोक्षदा कोटिरूपिणी ॥ 77॥

क्रतुः कात्यायनी स्वच्छा सुच्छन्दा च कविप्रिया ।
सत्यागमा बहिःस्था च काव्यशक्तिः कवित्वदा॥ 78॥

मुनिपुत्री माता सती साध्वी मैनाकभगिनी तटित् ।
सौदामिनी सुदामा च सुधामा धामशालिनी ॥ 79॥

सौभाग्यदायिनी द्यौश्च सुभगा द्युतिवर्धिनी ।
श्रीकृत्तिवसना चैव कङ्काली कलिनाशिनी ॥ 80॥

रक्तबीजवधोद्युक्ता सुतन्तुर्बीजसन्ततिः ।
जगज्जीवा जगद्बीजा जगत्रयहितैषिणी । ॥ 81॥

चामीकररुचिश्चन्द्री साक्षाद्याषोडशीकला ।
यत्तत्पदानुबन्धा च यक्षिणी धनदार्चिता ॥ 82॥

चित्रिणी चित्रमाया च विचित्रा भुवनेश्वरी ।
चामुण्डा मुण्डहस्ता च चण्डमुण्डवधोद्यता ॥ 83॥

अष्टम्येकादशी पूर्णा नवमी च चतुर्दशी ।
अमा कलशहस्ता च पूर्णकुम्भपयोधरा ॥ 84॥

अभीरूर्भैरवी भीरूर् भीमा त्रिपुरभैरवी ।
महारुण्डा च रौद्री च महाभैरवपूजिता ॥ 85॥

निर्मुण्डा हस्तिनीचण्डा करालदशनानना ।
कराला विकराला च घोरा घुर्घुरनादिनी । ॥ 86॥

रक्तदन्तोर्ध्वकेशी च बन्धूककुसुमारुणा ।
कादम्बिनी पटासा च काश्मीरी कुङ्कुमप्रिया ॥ 87॥

क्षान्तिर्बहुसुवर्णा च रतिर्बहुसुवर्णदा ।
मातङ्गिनी वरारोहा मत्तमातङ्गगामिनी ॥ 88॥

हंसा हंसगतिर्हंसी हंसोज्वलशिरोरुहा ।
पूर्णचन्द्रमुखी क्षामा स्मितास्या च सुकुण्डला ॥ 89॥

महिषी लेखनी लेखा सुलेखा लेखकप्रिया ।
शङ्खिनी शङ्खहस्ता च जलस्था जलदेवता ॥ 90॥

कुरुक्षेत्राऽवनिः काशी मथुरा काञ्चवन्तिका ।
अयोध्या द्वारिका माया तीर्था तीर्थकरप्रिया ॥ 91॥

त्रिपुष्कराऽप्रमेया च कोशस्था कोशवासिनी ।
कौशिकी तु कुशावर्ता कौशाम्बी कोशवर्धिनी ॥ 92॥

कोशदा पद्मकोशाक्षी कौसुम्भकुसुमप्रिया ।
तोतला च तुलाकोटिः कूटस्था कोटराश्रया । ॥ 93॥

स्वयम्भूश्च सुरूपा च स्वरूपा पुण्यवर्धिनी ।
तेजस्विनी सुभिक्षा च बलदा बलदायिनी ॥ 94॥

महाकोशी महावार्ता बुद्धिः सदसदात्मिका ।
महाग्रहहरा सौम्या विशोका शोकनाशिनी ॥ 95॥

सात्विकी सत्वसंस्था च राजसी च रजोवृता ।
तामसी च तमोयुक्ता गुणत्रयविभाविनी ॥ 96॥

अव्यक्ता व्यक्तरूपा च वेदविद्या च शाम्भवी ।
शङ्करा कल्पिनी कल्पा मनस्सङ्कल्पसन्ततिः ॥ 97॥

सर्वलोकमयी शक्तिः सर्वश्रवणगोचरा ।
सर्वज्ञानवती वाञ्छा सर्वतत्त्वावबोधिका ॥ 98॥

जाग्रतिश्च सुषुप्तिश्च स्वप्नावस्था तुरीयका ।
सत्वरा मन्दरा मन्दा मन्दिरा मोददायिनी ॥ 99॥

मानभूमिः पानपात्रा पानदानकरोद्यता ।
अपूर्णारुणनेत्रा च किञ्चिदव्यक्तभाषिणी ॥ 100॥

आशापुरा च दीक्षा च दक्षा दीक्षितपूजिता ।
नागवल्ली नागकन्या भोगिनी भोगवल्लभा ॥ 101॥

सर्वशास्त्रमयी विद्या सुस्मृतिर्धर्मवादिनी ।
श्रुतिस्मृतिधरा ज्येष्ठा श्रेष्ठा पातालवासिनी ॥ 102॥

मीमांसा तर्कविद्या च सुभक्तिर्भक्तवत्सला ।
सुनाभिर्यातनाजातिर्गम्भीरा भाववर्जिता ॥ 103॥

नागपाशधरामूर्तिरगाधा नागकुण्डला ।
सुचक्रा चक्रमध्यस्था चक्रकोणनिवासिनी ॥ 104॥

सर्वमन्त्रमयी विद्या सर्वमन्त्राक्षरावलिः ।
मधुस्रवा स्रवन्ती च भ्रामरी भ्रमरालिका ॥ 105॥

मातृमण्डलमध्यस्था मातृमण्डलवासिनी ।
कुमार जननी क्रूरा सुमुखी ज्वरनाशिनी ॥ 106॥

अतीता विद्यमाना च भाविनी प्रीतिमञ्जरी ।
सर्वसौख्यवतीयुक्तिराहारपरिणामिनी ॥ 107॥

निधाना पञ्चभूतानां भवसागरतारिणी ।
अक्रूरा च ग्रहावती विग्रहा ग्रहवर्जिता ॥ 108॥

रोहिणी भूमिगर्भा च कालभूः कालवर्तिनी ।
कलङ्करहिता नारी चतुःषष्ठ्यभिधावती ॥ 109॥

जीर्णा च जीर्णवस्त्रा च नूतना नववल्लभा ।
अजरा च रजःप्रीता रतिरागविवर्धिनी ॥ 110॥

पञ्चवातगतिर्भिन्ना पञ्चश्लेष्माशयाधरा ।
पञ्चपित्तवतीशक्तिः पञ्चस्थानविभाविनी ॥ 111॥

उदक्या च वृषस्यन्ती बहिः प्रस्रविणी त्र्यहा ।
रजःशुक्रधरा शक्तिर्जरायुर्गर्भधारिणी ॥ 112॥

त्रिकालज्ञा त्रिलिङ्गा च त्रिमूर्तिस्त्रिपुरवासिनी ।
अरागा शिवतत्त्वा च कामतत्वानुरागिणी ॥ 113॥

प्राच्यवाची प्रतीची च दिगुदीची दिग्विदिग्दिशा ।
अहङ्कृतिरहङ्कारा बाला माया बलिप्रिया ॥ 114॥

शुक्रश्रवा सामिधेनी सुश्रद्धा श्राद्धदेवता ।
माता मातामही तृप्तिः पितुमाता पितामही ॥ 115॥

स्नुषा दौहित्रिणी पुत्री पौत्री नप्त्री शिशुप्रिया ।
स्तनदा स्तनधारा च विश्वयोनिः स्तनन्धयी ॥ 116॥

शिशूत्सङ्गधरा दोला लोला क्रीडाभिनन्दिनी ।
उर्वशी कदली केका विशिखा शिखिवर्तिनी ॥ 117॥

खट्वाङ्गधारिणी खट्वबाणपुङ्खानुवर्तिनी ।
लक्ष्यप्राप्तिकरा लक्ष्यालक्ष्या च शुभलक्षणा ॥ 118॥

वर्तिनी सुपथाचारा परिखा च खनिर्वृतिः ।
प्राकारवलया वेला मर्यादा च महोदधिः ॥ 119॥

पोषिणी शोषिणी शक्तिर्दीर्घकेशी सुलोमशा ।
ललिता मांसला तन्वी वेदवेदाङ्गधारिणी ॥ 120॥

नरासृक्पानमत्ता च नरमुण्डास्थिभूषणा ।
अक्षक्रीडारतिः शारि सारिकाशुकभाषिणी ॥ 121॥

शाम्भरी गारुडीविद्या वारुणी वरुणार्चिता ।
वाराही तुण्डहस्ता च दंष्ट्रोद्धृतवसुन्धरा । ॥ 122॥

मीनमूर्तिर्धरामूर्तिर्- वदान्याऽप्रतिमाश्रया ।
अमूर्ता निधिरूपा च शालिग्रामशिलाशुचिः ॥ 123॥

स्मृतिसंस्काररूपा च सुसंस्कारा च संस्कृतिः ।
प्राकृता देशभाषा च गाथा गीतिः प्रहेलिका ॥ 124॥

इडा च पिङ्गला पिङ्गा सुषुम्ना सूर्यवाहिनी ।
शशिस्रवा च तालुस्था काकिन्यमृतजीविनी ॥ 125॥

अणुरूपा बृहद्रूपा लघुरूपा गुरुस्थिता ।
स्थावरा जङ्गमाचैव कृतकर्मफलप्रदा ॥ 126॥

विषयाक्रान्तदेहा च निर्विशेषा जितेन्द्रिया ।
चित्स्वरूपा चिदानन्दा परब्रह्मप्रबोधिनी ॥ 127॥

निर्विकारा च निर्वैरा विरतिः सत्यवर्द्धिनी ।
पुरुषाज्ञा चा भिन्ना च क्षान्तिः कैवल्यदायिनी ॥ 128॥

विविक्तसेविनी प्रज्ञा जनयित्री च बहुश्रुतिः ।
निरीहा च समस्तैका सर्वलोकैकसेविता ॥ 129॥

शिवा शिवप्रिया सेव्या सेवाफलविवर्द्धिनी ।
कलौ कल्किप्रिया काली दुष्टम्लेच्छविनाशिनी ॥ 130॥

प्रत्यञ्चा च धुनर्यष्टिः खड्गधारा दुराननिः ।
अश्वप्लुतिश्च वल्गा च सृणिः सन्मृत्युवारिणी ॥ 131॥

वीरभूर्वीरमाता च वीरसूर्वीरनन्दिनी ।
जयश्रीर्जयदीक्षा च जयदा जयवर्द्धिनी ॥ 132॥

सौभाग्यसुभगाकारा सर्वसौभाग्यवर्द्धिनी ।
क्षेमङ्करी क्षेमरूपा सत्कीर्त्तिः पथिदेवता ॥ 133॥

सर्वतीर्थमयीमूर्तिः सर्वदेवमयीप्रभा ।
सर्वसिद्धिप्रदा शक्तिः सर्वमङ्गलमङ्गला ॥ 134॥

फलश्रुतिः

पुण्यं सहस्रनामेदं शिवायाः शिवभाषितम् ।
यः पठेत्प्रातरुत्थाय शुचिर्भूत्वा समाहितः ॥ 135॥

यश्चापिशृणुयान्नित्यं नरो निश्चलमानसः ।
एककालं द्विकालं वा त्रिकालं श्रद्धयान्वितः ॥ 136॥

सर्वदुःखविनिर्मुक्तो धनधान्यसमन्वितः ।
तेजस्वी बलवाञ्छूरः शोकरोगविवर्जितः ॥ 137॥

यशस्वी कीर्तिमान्धन्यः सुभगो लोकपूजितः ।
रूपवान्गुणसम्पन्नः प्रभावीर्यसमन्वितः ॥ 138॥

श्रेयांसि लभतेनित्यं निश्चलां च शुभां श्रियम् ।
सर्वपापविनिर्मुक्तो लोभक्रोधविवर्जितः ॥ 139॥

नित्यं बन्धुसुतैर् दारैः पुत्रपौत्रैर्महोत्सवैः ।
नन्दितः सेवितो भृत्यैर्बहुभिः शुद्धमानसैः ॥ 140॥

विद्यानां पारगो विप्रः क्षत्रियो विजयी रणे ।
वैश्यस्तुधनलाभाढ्यः शूद्रश्चसुखमेधते ॥ 141॥

पुत्रार्थी लभते पुत्रां धनार्थी लभते धनम् ।
इच्छाकामं तु कामार्थी धर्मार्थी धर्ममक्षयम् ॥ 142॥

कन्यार्थी लभते कन्यां रूपशीलगुणान्विताम् ।
क्षेत्रं च बहुशस्यं स्याद्गावस्तु बहुदुग्धदाः ॥ 143॥

नाशुभं नापदस्तस्य न भयं नृपशत्रुभिः ।
जायते ना शुभाबुद्धिर्लभते कुलधुर्यताम् ॥ 144॥

न बाधन्ते ग्रहास्तस्य न रक्षांसि न पन्नगाः ।
न पिशाचो न डाकिन्यो भूतव्यन्तरजृम्भिकाः ॥ 145॥

बालग्रहाभिभूतानां बालानां शान्तिकारकम् ।
द्वन्द्वानां प्रीतिभेदे च मैत्रीकरणमुत्तमम् ॥ 146॥

लोहपाशैर्दृढैर्बद्धो बद्धो वेश्मनि दुर्गमे ।
तिष्ठन् शृण्वन्पठेन्मर्त्यो मुच्यते नात्र संशयः ॥ 147॥

न दाराणां न पुत्राणां न बन्धूनां न मित्रजम् ।
पश्यन्ति तेन शोकं हि वियोगं चिरजीविताम् ॥ 148॥

अन्धस्तु लभते दृष्टिं चक्षुरोगैर्नबाध्यते ।
बधिरः श्रुतिमाप्नोति मूको वाचं शुभान्नरः ॥ 149॥

पतद्गर्भा च या नारी स्थिरगर्भा प्रजायते ।
स्रावणी बद्धगर्भा च सुखमेवप्रसूयते ॥ 150॥

कुष्ठिनः शीर्णदेहा ये गतकेशनखत्वचः ।
पठनाच्छ्रवणाद्वापि दिव्यकाया भवन्ति ते ॥ 151॥

ये पठन्ति शतावर्तं शुचिष्मन्तो जितेन्द्रियाः ।
अपुत्राः प्राप्नुयुः पुत्रान् शृण्वन्तोऽपि न संशयः ॥ 152॥

महाव्याधि परिग्रस्तास्तप्ता ये विविधैर्ज्वरैः ।
भूताभिषङ्ग सङ्घातैश्-चातुर्थिक तृतीयकैः ॥ 153॥

अन्यैश्च दारुणैरोगैः पीड्यमानाश्च मानवाः ।
गतबाधाः प्रजायन्ते मुक्तास्तेतैर्नसंशयः ॥ 154॥

श्रुतिग्रन्थधरोबालो दिव्यवादी कवीश्वरः ।
पठनाच्छ्रवणाद्वापि भवत्येव न संशयः ॥ 155॥

अष्टम्यां वा चतुर्दश्यां नवम्यां चैकचेतसः ।
ये पठन्ति सदाभक्त्या न ते वै दुःखभागिनः ॥ 156॥

नवरात्रं जिताहारो दृढभक्तिर्जिन्तेन्द्रियः ।
चण्डिकायतने विद्वान्च्छुचिष्मान् मूर्तिसन्निधौ ॥ 157॥

एकाकी च शतावर्तं पठन्धीरश्च निर्भयः ।
साक्षाद्भगवती तस्मै प्रयच्छेदीप्सितं फलम् ॥ 158॥

सिद्धपीठे गिरौ रम्ये सिद्धक्षेत्रे सुरालये ।
पठनात्साधकस्याशु सिद्धिर्भवति वाञ्छिता ॥ 159॥

दशावर्तं पठेन्नित्यं भूमिशायी नरः शुचिः ।
स्वप्ने मूर्तिमयीं देवीं वरदां सोऽपि पश्यति ॥ 160॥

आवर्तन सहस्रैर्ये पठन्ति पुरुषोत्तमाः ।
ते सिद्धाः सिद्धिदा लोके शापानुग्रहणे क्षमाः ॥ 161॥

कवित्वं संस्कृतेतेषां शास्त्राणां व्याकृतौ ततः ।
शक्तिः प्रोन्मील्यते शास्त्रेष्वनधीतेषु भारती ॥ 162॥

नखरागशिरोरत्नद्विगुणीकृतरोचिषः ।
प्रयच्छन्तश्च सर्वस्वं सेवन्ते तान्महीश्वराः ॥ 163॥

रोचनालिखितं भूर्जे कुङ्कुमेन शुभे दिने ।
धारयेद्यन्त्रितं देहे पूजयित्वा कुमारिकाम् ॥ 164॥

विप्राञ्श्च वरनारीश्च धूपैः कुसुमचन्दनैः।
क्षीरखण्डाज्य भोज्यैश्च पूजयित्वा सुभूषिताः॥ 165॥

बध्नन्तिये महारक्षां बालानां च विशेषतः ।
भवन्ति नृप पूज्यास्ते कीर्तिभाजो यशस्विनः ॥ 166॥

शत्रुतो न भयंतेषां दुर्जनेभ्यो न राजतः ।
न च रोगो न वै दुःख न दारिद्यं न दुर्गतिः ॥ 167॥

महार्णवे महानद्यां स्थितेऽपि च नभीः क्वचित् ।
रणे द्यूते विवादे च विजयं प्राप्नुवन्ति ते ॥ 168॥

नृपाश्च वश्यतां यान्ति नृपमान्याश्च ये नराः ।
सर्वत्र पूजिता लोके बहुमानपुरस्सराः ॥ 169॥

रतिरागविवृद्धाश्च विह्वलाः कामपीडिताः ।
यौवनाक्रान्तदेहा स्ताः श्रयन्ते वामलोचनाः ॥ 170॥

लिखितं मूर्ध्निकण्ठे वा धारयेद्यो रणे शुचिः ।
शतधायुध्यमानं तु प्रतियोद्धा न पश्यति ॥ 171॥

केतौ वा दुन्दुभौ येषां निबद्धं लिखितं रणे ।
महासैन्ये परित्रस्तान्कान्दिशीकान्हतौजसः॥ 172॥

विचेतनान्विमूढांश्च शत्रुकृत्यविवर्जितान् ।
निर्जित्य शत्रुसङ्घास्ते लभन्ते विजयं ध्रुवम् ॥ 173॥

नाभिचारो ने शापश्च बाणवीरादिकीलनम् ।
डाकिनी पूतनाकृत्या महामारी च शाकिनी ॥ 174॥

भूतप्रेत पिशाचाश्च रक्षांसि व्यन्तरादयः ।
न विशन्ति गृहे देहे लिखितं यत्रतिष्ठति ॥ 175॥

न शस्त्रानलतोयौघैर्भयं तस्योपजायते ।
दुर्वृत्तानां च पापानां बलहानिकरं परम् ॥ 176॥

मन्दुराकरिशालासु गवां गोष्ठे समाहितः ।
पठेत्तद्दोषशान्त्यर्थं कूटं कपटनाशिनी । ॥ 177॥

यमदूतान्न पश्यन्ति न ते निरययातनाम् ।
प्राप्नुवन्त्यक्षयं शान्तं शिवलोकं सनातनम् ॥ 178॥

सर्वबाधासुघोराषु सर्वदुःखनिवारणम् ।
सर्वमङ्गलकं स्वर्ग्यं पठितव्यं समाहितैः ॥ 179॥

श्रोतव्यं च सदा भक्त्या परं स्वस्त्ययनं महत् ।
पुण्यं सहस्रनामेदमम्बाया रुद्रभाषितम् ॥ 180॥

चतुर्वर्गप्रदं सत्यं नन्दिकेन प्रकाशितम् ।
नातः परतरो मन्त्रो नातः परतरः स्तवः ॥ 181॥

नातः परतरा विद्या तीर्थं नातः परात्परम् ।
तेधन्याः कृतपुण्यास्ते त एव भुवि पूजिताः ॥ 182॥

एकवारं मुदा नित्यं येऽर्चयन्ति महेश्वरीम् ।
देवतानां देवताया ब्रह्माद्यैर्या च पूजिता ॥ 183॥

भूयात्सा वरदा लोके साधूनां विश्वमङ्गला ।
एतामेव पुराराद्यां विद्यां त्रिपुरभैरवीम् ॥ 184॥

त्रैलोक्यमोहिनीरूपामकार्षीद्भगवान्हरिः ॥ 185॥

॥ इति श्रीरुद्रयामलेतन्त्रे नन्दिकेश्वरसंवादे महाप्रभावी
भवानीनामसहस्रस्तोत्रं सम्पूर्णम् ॥